# ॥ ॐ ॥

# ॥ नारायणवर्म ॥

**राजोवाच -**

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।

क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ 1 ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।

यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ 2 ॥

**श्रीशुक उवाच -**

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।

नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ 3 ॥

**श्रीविश्वरूप उवाच -**

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।

कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ 4 ॥

नारायणमयं वर्म सन्नह्येद्भय आगते ।

दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ॥ 5 ॥

पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ।

मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ॥ 6 ॥

नमो नारायणायेति विपर्ययमथापि वा ।

करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ 7 ॥

प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ।

न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि ॥ 8 ॥

षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ।

वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ॥ 9 ॥

मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ।

सविसर्गं फडन्तं तु सर्वदिक्षु विनिर्दिशेत् ॥ 10 ॥

**"ॐ विष्णवे नमः"**

इत्यात्मानं परं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ।

विद्यातेजस्तपोमूर्तिरिमं मन्त्रमुदाहरेत् ॥ 11 ॥

हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।

दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ 12 ॥

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।

स्थले च मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ 13 ॥

दुर्गेष्वटव्याजिमखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।

विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ 14 ॥

रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।

रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो माम् ॥ 15 ॥

मामुग्रधन्वा निखिलप्रमादान्नारायणः पातु नरश्च हासात् ।

दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबन्धात् ॥ 16 ॥

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षो मां पथि देवहेलनात् ।

देवर्षिवर्यः पुरुषान्तरार्चनात् कूर्मो हरिर्मां निरयादशेषात् ॥ 17 ॥

धन्वन्तरिर्भगवान् पात्वपथ्याद्द्वन्द्वाद्भयादृषभो निर्जितात्मा ।

यज्ञश्च लोकादुत तत्कृतान्नो बलोगणात् क्रोधवशादहीन्द्रः ॥ 18 ॥

द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखण्डगणात् प्रमादात् ।

कल्की कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥ 19 ॥

मां केशवो गदया प्रातरव्याद्गोविन्द आसङ्गव आत्तवेणुः ।

नारायणः पातु सदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ 20 ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।

दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ 21 ॥

श्रीवत्सलक्ष्मापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।

दामोदरोऽव्यादनुसन्ध्यं प्रभाते विष्णुः श्रीमान् भगवान् कालमूर्तिः ॥ 22 ॥

चक्रं युगान्तानलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तम् ।

दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वायुसखो हुताशः ॥ 23 ॥

गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।

कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ 24 ॥

त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।

दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरीन् हृदयानि कम्पयन् ॥ 25 ॥

त्वं तिग्मधारासि वरारिसैन्यमीशप्रयुक्तो मम छिन्दि छिन्दि ।

चक्षूंषि चर्मन् शतचन्द्र छादय द्विषामघं नो हर पापचक्षुषाम् ॥ 26 ॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।

सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ 27 ॥

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।

प्रयान्तु सङ्क्षयं सद्यो येऽन्ये श्रेयःप्रतीपकाः ॥ 28 ॥

गरुडो भगवान् स्तोत्रस्तोमच्छन्दोमयः प्रभुः ।

रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ 29 ॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।

बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ 30 ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।

सत्येन तेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ 31 ॥

यथैकात्म्यानुभावेन विकल्परहितः स्वयम् ।

भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ 32 ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।

पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ 33 ॥

विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान् नारसिंहः ।

प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ 34 ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।

विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ 35 ॥

एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।

पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ 36 ॥

न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ।

राजदस्युग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥ 37 ॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।

योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ 38 ॥

तस्योपरि विमानेन गन्धर्वपतिरेकदा ।

ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ 39 ॥

साङ्गनो न्यपतत् सद्यः सविमानो ह्यवाक्छिराः ।

विद्यामिमां धारयतो मृतस्यास्थिविलङ्घनात् ॥ 40 ॥

स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।

प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ 41 ॥

य इदं शृणुयात् काले यो धारयति चादृतः ।

तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ 42 ॥

**श्रीशुक उवाच -**

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।

त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ 43 ॥

**॥ इति श्रीमद्भागवते षष्ठस्कन्धेऽष्टमेऽध्याये नारायणवर्मोपदेशः ॥**

Extracted & Proofed by: **Dr. Diddigi Vamsi Krishna** M.A., Ph.D.

Font Courtesy: **www.adishila.com (Adishila Letterpress Semibold)**

Any corrections are accepted through given Email ID: **shimshuprati@gmail.com**